# Arati - as chanted in Arunachala Ashrama (02/14)

ॐ गणानां त्वा गणपतिँ हवामहे कविं कवीनामुपमश्रवस्तमम् ।
ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः शृण्वन्नूतिभिस्सीदसादनम् ॥
ॐ श्री महागणपतये नमः ॥

ॐ नमो हिरण्यबाहवे हिरण्यवर्णाय हिरण्यरूपाय हिरण्यपतयेऽम्बिकापतय
उमापतये पशुपतये नमो नमः ॥

ऋतँ सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् । ऊर्ध्व रेतं विरूपाक्षं विश्वरूपाय वै नमो
नमः ॥ ईशान-स्सर्व-विद्याना-मीश्वर-स्सर्वभूतानां ब्रह्माऽधिपतिर्-
ब्रह्मणोधिपतिर्-ब्रह्मा शिवो मे अस्तु सदाशिवोम् ॥ ॐ भूर्भु-वस्सुवः ॥ ॐ नमः
शम्भवे च मयोभवे च नमः   शंकराय च मयस्कराय च नमः शिवाय च शिवतराय च ॥

ॐ निधनपतये नमः । निधनपतान्तिकाय नमः । ऊर्ध्वाय नमः । ऊर्ध्वलिङ्गाय
नमः । हिरण्याय नमः । हिरण्यलिङ्गाय नमः । सुवर्णाय नमः । सुवर्णलिङ्गाय नमः ।
दिव्याय नमः ।   दिव्यलिङ्गाय नमः । भवाय नमः । भवलिङ्गाय नमः । शर्वाय नमः ।
शर्वलिङ्गाय नमः । शिवाय नमः । शिव लिङ्गाय नमः । ज्वलाय नमः । ज्वललिङ्गाय
नमः । आत्माय नमः । आत्मलिङ्गाय नमः । परमाय नमः । परमलिङ्गाय नमः ।
एतत्सोमस्य सूर्यस्य सर्व लिङ्गँ स्थापयति पाणिमन्त्रं पवित्रम् ॥

सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः। भवे भवे नातिभवे भवस्वमाम्।
भवोद्भवाय नमः॥ वामदेवाय नमो ज्येष्ठाय नम-श्रेष्ठाय नमो रुद्राय नमः कालाय नमः
कलविकरणाय नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय
नम-स्सर्व-भूतदमनाय नमो मनोन्मनाय नमः॥

अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः। सर्वेभ्य-स्सर्वशर्वेभ्यो नमस्ते अस्तु
रुद्ररूपेभ्यः।

सर्वो वै रुद्र-स्तस्मैरुद्राय नमो अस्तु। पुरुषो वै रुद्र-स्सन्महो नमो नमः।
विश्वंभूतं भुवनं चित्रं बहुधा जातं जायमानं च यत्। सर्वो ह्येष रुद्र-स्तस्मैरुद्राय नमो
अस्तु।

कद्रुद्राय प्रचेतसे मीढुष्टमाय तव्यसे। वो चेम शन्तमँ हृदे। सर्वो ह्येष रुद्र-स्तस्मै
रुद्राय नमो अस्तु॥

त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम्। उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात्॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे। तान् यज्ञस्य मायया
सर्वा-नवयजामहे॥

मृत्यवे स्वाहा मृत्यवे स्वाहा। ॐ नमो भगवते रुद्राय विष्णवे मृत्युर्मे पाहि॥

ॐ तत्पुरुषय विद्महे महादेवाय धीमहि। तन्नो रुद्रः प्रचोदयात्॥

ॐ नमस्ते अस्तु भगवन्विश्वेश्वराय महादेवाय त्र्यंबकाय त्रिपुरान्तकाय त्रिकाग्निकालाय कालाग्निरुद्राय नीलकण्ठाय मृत्युंजयाय सर्वेश्वराय सदाशिवाय श्रीमन्महादेवाय नमः

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे ॥ सदाशिवोम् ॥

न कर्मणा न प्रजया धनेन त्यागेनैके अमृतत्व-मानशुः । परेण नाकं निहितं गुहायां विभ्राजदेतद्यतयो विशन्ति । वेदान्तविज्ञान-सुनिश्चितार्था स्संन्यास योगाद्यतयश्शुद्धसत्त्वाः । ते ब्रह्मलोकेतु परान्तकाले परामृतात्परिमुच्यन्ति सर्वे । दह्रं विपापं परमेऽश्मभूतं यत्पुण्डरीकं पुरमद्यसँस्थम् । तत्रापि दह्रं गगनं विशोकस्-तस्मिन् यदन्तस्त-दुपासितव्यम् । यो वेदादौ स्वरः प्रोक्तो वेदान्ते च प्रतिष्ठितः । तस्य प्रकृति-लीनस्य यः परस्स महेश्वरः ॥

ॐ शान्तिः शान्तिः शान्तिः ॥